श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ नावल्पाकमणिमाला ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ नावल्पाकमणिमाला ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

सुमशरशतगर्वाक्षेपदक्षस्ववर्ष्मा
    हिमकरसहजातावासभूर्यस्य वक्षः।
समकरसरितस्तत्सन्निधौ सन्निविष्टः
    मम करयुगभूतेरञ्जलेरस्तु लक्ष्यम्॥ 1 ॥

यथा क्रतूनां महितोऽश्वमेधः
    तथा सुराणां महितोऽश्ववक्त्रः।
इतीदमालोच्य हि देशिकेन्द्राः
    लक्ष्यं क्रतूनां तमिमं भजन्ति॥ 2 ॥

भजतां मधुजिद्वचोविलासं
    कलयत्येष रमातुरङ्गवक्त्रः।
मधुजित्पदकीर्तितः पुराणे
    तदयं हीति भजन्ति देशिकेन्द्राः॥ 3 ॥

सुधांशुबिम्बस्थितदिव्यदेहं
    विधातृयोषिद्विनताङ्घ्रिपद्मम्।
सुधाझरीतुल्यवचःप्रवाहैः
    तथाविधं धाम विभाति किञ्चित्॥ 4 ॥

आकन्धरमादिपुमान्
    उपरि च गन्धर्वनाथसन्तानः।

इन्धे कश्चन हृदये
    किं धाताप्यस्ति मामलङ्कर्तुम्॥ 5॥

जम्बूद्वीपे विबुधमहिते श्रीविलासास्पदेऽस्मिन्
    जम्बूपाके विबुधमहिते श्रीनिवासास्पदेऽस्मिन्।
जम्बूवर्णं वपुषि वहतस्सम्पदृक्षेऽभिजातः
    जम्बूरागं मनसि च गुरुस्सम्पदे नस्समिन्धे॥ 6॥

मृगशिरसि धरण्यामुद्गतो देशिकेन्द्रः
    मृगशिरसि कलानामास्पदे सक्तबुद्धिः।
मृगशिरसि हिरण्याक्षेपकेऽप्येष कुर्यात्
    मृगशिरसि निवेश्यान् मादृशान् ज्ञानपूर्णान्॥ 7॥

श्रीरामानुजजन्मर्क्षमध्यर्क्षे सम्भवन् गुरुः।
आचार्यतां च दैवत्वमात्मनो ज्ञापयत्यसौ॥ 8॥

व्याख्यां सारावलेर्यामतनुत भगवान् सुन्दरार्यो गुरुर्नः
    व्याख्यां श्रीतत्त्वसारस्य च गुरुमहितग्रन्थरत्नोत्तमस्य।
योऽयं सोऽयं यदीयं पदकमलयुगं मस्तके संविधत्ते
    नित्यं तस्मै नमस्तात् सकलभवुकभूम्यण्णयार्योत्तमाय॥ 9॥

उन्नयामि विनतानिति हर्षात्
    अन्नयन्तममुमण्णयमाहुः।
एतदानतहयास्यसेविनी
    भारतीललितभारतीविदः॥ 10॥

श्रीकान्तरामानुजसम्पदृक्षं
    श्रीदान्तरामानुजहृद्यमीडे।

वेदान्तरामानुजमौलिवन्द्यं
वेदान्तरामानुजपादसक्तम् ॥ 11 ॥

श्रीमद्भाष्यसुवर्णभूषिततनुं श्रीवक्त्रवाणीरसैः
सम्यङ्मोहितसर्वलोकहृदयां शान्तां च कान्तां तथा।
भूयोभिस्सुमनः कुलैरपि धृतां वेदान्तरामामहं
तद्भ्रातुर्गुरुसत्तमस्य समितौ लीलावतीं चिन्तये ॥ 12 ॥

ना विल् रामं मनसि सततं संवहन् सीतये तं
नाविल् रामामपि भगवतो नाभिपद्मोत्थितस्य।
नाविल्पाके विरचितजनैः सन्मणेस्सत्सभायां
ना विल्लूरान् इति कृतिमुदे किञ्चन व्याजहार ॥ 13 ॥

॥ इति नावल्पाकमणिमाला समाप्ता ॥

sunder kidambi prapatti dot com sunder kidambi